IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# महाभारते राजसूययागस्य प्रस्तावना – एकं परिशीलनम्

**DSV Jagannatha Sharma**
Assistant Professor
Kalpa Department
S.V. Vedic University
Tirupati

**प्रस्तावना**

संस्कृतवाङ्मयं वैदिकं लौकिकञ्चेति द्विविधम्। तत्र वेदाः, पुराणानि, इतिहासाग्रन्थाश्च वैदिकवाङ्मये, काव्यानि लौकिकवाङ्मये चान्तर्भवन्ति। तत्र रामायणमहाभारतौ इतिहासग्रन्थौ। रामायणमाद्यकाव्यमिति मन्यन्ते। तत्पश्चात् महाभारतं भारतदेशे प्रमुखधार्मिकग्रन्थत्वेन विराजते। ग्रन्थोऽयम् अनुपमधार्मिक – पौराणिक – ऐतिहासिक – दार्शनिकग्रन्थरूपेण विज्ञायते। पञ्चमवेदत्वेन जयनाम्ना चाभिधीयते। महाभारते लक्षाधिकश्लोकाः सन्ति। कौरवपाण्डवसङ्ग्रामः वेदव्यासेन सम्यक् उपवर्णितोऽस्ति। शतपथब्राह्मणे, छान्दोग्योपनिषदि च महाभारतपात्राणि वर्णितानि। पाणिनिमहर्षिणा विरचित अष्टाध्याय्यामपि महाभारतस्य भारतदेशस्य च उल्लेखो लभ्यते। महत्वात् भारत्वाच्च महाभारतमुच्यते।

**धर्मे च अर्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।**

व्यासस्य कृष्णद्वैपायनः, बादरायणः, वैशम्पायनः, सात्यवतेयः इति नामानि प्रसिद्धानि। महाभारतम् विश्वकोशात्मको ग्रन्थः इति कथने नास्त्यतिशयोक्तिः। अष्टादशपर्वसु विभक्तोऽयं ग्रन्थः। वैदिकं च लौकिकं तथ्यं, दर्शनं, नीतिशास्त्रम्, राजनीतिशास्त्रम्, अध्यात्मं, आचारव्यवहारविषयाः, लोकोपोगितत्त्वम् इत्याद्यनेके अंशाः अस्मिन् ग्रन्थे प्रस्तावितास्सन्ति। महाभारते नैकानि महत्त्वपूर्णविषयग्राहिकतत्वानि, नैके ज्ञानप्रभाप्रसारिकाः शास्त्रविषयाः मूर्धन्या इव समादृतास्सन्ति। भीष्मपर्वणि भगवद्गीताऽस्ति तथैव साङ्ख्ययोगदर्शनयोः च सिद्धान्तानां विवेचनम् अत्र उपलभ्यते। आनुशासनिकपर्वणि भीष्मः युधिष्ठिराय विष्णुसहस्रनामस्तोत्रम् कथयति। महाभारतस्य कथांशाः बीजरूपेण वेदेषु दृश्यन्ते। यथा यजुर्वेदस्य काठकसंहितायां विचित्रवीर्यधृतराष्ट्रयोः प्रस्तावः कृतः। अथर्ववेदे परीक्षित् महाराजस्य राज्यपालनम् प्रास्तौत्। साङ्ख्यायनश्रौतग्रन्थेषु कुरुक्षेत्रयुद्धस्य, कौरवाणां पराजयस्य च उल्लेखो दृश्यते। आश्वलायनगृह्यसूत्रेष्वपि महाभारतविषयाः दृश्यन्ते। महाभारते गङ्गावतरणोपाख्यानम्, मार्कण्डेयोपाख्यानम्, शकुन्तलोपाख्यानम्, नलोपाख्यानम्, त्रिपुरासुरसंहारः, रामोपाख्यानमित्यादि उपाख्यानानि उल्लिखितानि। महाभारताधारेण किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितम्, भारतमञ्जरी, नलाभ्युदयः इत्यादि काव्यानि, अभिज्ञानशाकुन्तलम्, वेणीसंहारं, बालभारतमित्यादि नाटकानि, नलचम्पूः भारतचम्पूः, पाञ्चालीस्वयंवरचम्पूः, द्रौपदीपरिणयचम्पूरिति चम्पूग्रन्थाः कविभिः उल्लिखिताः वर्तन्ते।

महाभारते यज्ञस्य वैशिष्ट्यमपि द्योतते। युधिष्ठिरः अश्वमेधयागः, राजसूययाज्ञश्च कृतवानिति महाभारतात् विज्ञायते।

**यज्ञस्य स्वरूपम्**

इज्यन्ते देवता अत्र यज देवपूजादौ नङ् प्रत्यये यज्ञः सिध्यति। यज्ञ एव सर्वकर्मसु श्रेष्ठकर्मरूपेण ब्राह्मणग्रन्थेषु विराजते। विश्वस्य सर्वश्रेष्ठतमो देवः प्रजापतिः यज्ञस्वरूप एव। यज्ञादेव सर्वसृष्टिः आविर्भूता इति आर्योक्तिः। नित्य – नैमित्तिक – काम्य – आध्यात्म – आधिदैविक – आधिभूतभेदैः कर्मयज्ञः षड्विधः प्रोक्तः। निर्गुणोपासना – सगुणोपासना – अवतारोपासना – ऋषिपितृदेवतोपासना – भूतप्रेतसुराद्युपासना – मन्त्रयोग – लययोग – राजयोग इति उपासनायज्ञः नवविधः प्रोक्तः। श्रवण – मनन – निधिध्यासनभेदेन ज्ञानयज्ञस्त्रिप्रकारको भवति। पुनः यज्ञः सात्त्विक – राजस – तामसभेदेन त्रिविधः प्रोक्तः।

**पञ्चमहायज्ञाः**

गृहस्थैः सर्वैः करणीयेषु कार्येषु पञ्चमहायज्ञाः अन्यतमाः ते च 1. ब्रह्मयज्ञः, 2. देवयज्ञः, 3. पितृयज्ञः, 4. बलिवैश्वदेवयज्ञः, 5. अतिथियज्ञः। एतैः पञ्चयज्ञैः क्लेशाः दूरी भवन्तीति जनानां विश्वासः।

**यज्ञस्य प्रकाराः**

यज्ञः अष्टविधो भवति – 1. पुत्रकोमिष्टयज्ञः, 2. सोमयज्ञः, 3. राजसूययज्ञः, 4. अश्वमेधयज्ञः, 5. अग्निहोत्रयज्ञः, 6. हवान्यज्ञः, 7. वास्तुयज्ञः, 8. नवचण्डीयज्ञश्च।

**को नाम राजसूययागः**

राजसूययागः पूर्वराजभिः क्रियमाण साम्राज्यत्यागसहितो पवित्रोत्सवः हरिश्चन्द्रः, रामः, धर्मराजप्रमुखाः यागमिमं कृतवन्तः। प्रप्रथमम् इन्द्रेण यागोऽयं कृत्वा स्वर्गपदवी प्राप्तम्। चक्रवर्तिलक्षणोपेतः सर्वशक्तिमान् राजा यः कोऽपि वा यागमिमं कर्तुं शक्नुयात्। यागस्य मुख्योद्देशः राजानम् सर्वे चक्रवर्तित्वेन अङ्गीकरणीयः इति। यागकरणाय सिद्धो राजा स्वसेन्यान् एकाभिप्रायसमर्थनाय चतुर्षु दिक्षु प्रेषयति। तदा कैश्चित् अङ्गीक्रियन्ते कैश्चित् तिरस्क्रियन्ते च। यो राजा विरुद्धरूपेण प्रतिघटयति सपदि एव युद्धे स्वस्य सामर्थ्यं दर्शनीयम्। युधिष्ठिरविषयेऽपि केचन अङ्गीकृतवन्तः। जरासन्धादयः केचन नाङ्गीकृतवन्तः मृताश्च।

**महाभारते राजसूययागप्रस्तावना**

महाभारते सभापर्वणि लिखितमस्ति यद्येकदा श्रीकृष्णार्जुनौ खाण्डवप्रस्थ नामक वने यमुना नद्यास्तटे विहरन्तौ आस्ताम्। तदा श्रीकृष्णेनोक्तं राज्यविस्तरणाय समयः आसन्न इति। खाण्डवप्रस्थम् अग्निना स्पर्शयत्विति अर्जुनमादिदेश श्रीकृष्णः। अत्यन्त सुन्दरमिदं कथमग्निना दह्यतेति अर्जुनः खेदमनुबभूव। यदि चक्रवर्तिपदवीं काङ्क्षते तर्हि कार्यमेतत् करणीयमेव। अरण्ये स्थिताः सर्वे जन्तवोऽपि अवश्यं मरणं प्राप्येरन्येव। यतः राज्यशान्तये शत्रुसंहारः अवश्यं करणीय एव। मानवजातिविकासाय अभिवृद्ध्यर्थञ्च हिमालयात् कन्याकुमारीपर्यन्तं यत् अरण्यम् अस्ति तत् दग्धं करणीयमेवेति कृष्णस्य वचांसि आकर्ण्य अर्जुनः भस्मीभूतञ्चकार। तत्र विशेषसर्पः मायासुरो नाम राक्षसश्च अवशिष्टौ। मायासुरः कृष्णार्जुनयोः समीपे आत्मसमर्पणं कृत्वा एवं निवेदयामास – अहमेकः वास्तुकारः निर्मातश्च। भवते अद्भुतसभाभवननिर्माणं क्रियते मया। कृपाया प्राणैः त्यजत्विति।तत्पश्चात् मायासुरः उत्कृष्टतमं भवनं निर्मितवान्। तत्रैव दुर्योधनस्य गर्वभङ्गोऽपि जातः। इन्द्रप्रस्थमति सुन्दरमस्ति यतो हि हस्तिनापुरात् अर्धभागमिताः जनाः अत्रैवागत्य निवसन्ति स्म। तद्दृष्ट्वा दुर्योधनस्य मनसि आक्रोशो जातः। एकदा नारदः पाण्डवसमीपमाजगाम। नारदः तिलोत्तमायाः कथां श्रावयित्वा द्रौपद्याः विषये नियमपालनमवश्यं करणीयमित्यादिदेश। द्रौपदी एकेन सह एकवर्षं यावत् यदा तिष्ठति तदा अन्ये चत्वारः तत्समीपमपि न सञ्चरणीयम्। अतः स्वराज्यस्थिरीकरणाय राजसूययागकरणमेव समुन्नतमार्गः इति नारदमहर्षिः राजसूयाय प्रेरयामास। राजसूययागस्तु सम्राट् भवितुमेको मार्गः

एव। परन्तु इन्द्रप्रस्थनगरे वयं सुखेन जीवनं यापयामस्तर्हि किमर्थं राजकांक्षा इति धर्मराजः सन्देहं प्रकटयामास। तदा नारदः एवमवदत् –

**समर्थोऽस्ति महीं जेतुं भ्रातरस्ते वशे स्थिताः।**

**राजसूयं क्रतुश्रेष्ठमाहरस्वेति भारत।।**[1]

यूयं सर्वे पञ्चभ्रातरः सम्पूर्णपृथिवीं जेतुं समर्था एव। अतः श्रेष्ठं राजसूययागं कुर्वन्तु। भवतः पितुः सङ्कल्पमपि सिद्ध्येत्। राजसूयकरणात् भवताम् पूर्वजा इव इन्द्रसदृशो विराजन्ते। यागविनाशाय बहवो प्रयतन्ते, यज्ञे किञ्चिदपि दोषोऽस्ति चेत् सर्वनाशो भवेद्येव। अतः चतुर्वर्णरक्षणार्थं वृद्ध्यर्थं च ब्राह्मणेभ्यः दानादिकं समर्प्य तोषणीयम्। नारदगमनान्तरं धर्मराजः यज्ञः करणीय इत्यचिन्त्ययत् –

**स राजसूयं राजेन्द्र कुरूणामृषभः क्रतुम्।**

**आहर्तुं प्रवणं चक्रे मनः संचिन्त्य सोऽसकृत्।।**[2]

मन्त्रिभिः प्रमुखैश्च स्वाभिलाषितं प्रकटयामास। तदा तैः उक्तं यत् त्वं सर्वसमथः, वयं सर्वे भवतामधीनाः, विना चिन्तयित्वा यज्ञाय सिद्धो भवत्वित्यादिदिशुः –

**समर्थोऽसि महाबाहो सर्वे ते वशगा वयम्।**

**अविचार्य महाराज राजसूये मनः कुरु।।**[3]

तत्पश्चात् युधिष्ठिरेण प्रार्थितः श्रीकृष्णः तत्राजगाम। श्रीकृष्णाय युधिष्ठिरः स्वाभिप्रायं निवेदयामास। श्रीकृष्णः धर्मराजस्य गुणान् प्रशंसन् एवमवदत् – हे भरतश्रेष्ठ! पृथिव्यां सर्वे राजानः ऐल तथा इक्ष्वाकुवंशजाः इति मन्यन्ते। तदतिरिच्य शतकुलानि सन्ति, तेषु पृथिव्याः मध्यमभागभोक्ता जरासन्धो एकः, सर्वदा कलहमानो अस्ति। अयं च जरासन्धः जन्मतः एव साम्राज्यं प्राप्तवान्। शिशुपालोऽपि जरासन्धस्य सहाय्येनैव सेनापतिपदवीं प्राप्तवान्। महापराक्रमी, मायायोधी, महाबलः करूषराजः जरासन्धस्य शिष्यवत् समुपस्थितः, हंस – डिभकौ जरासन्धस्य शरणे गतौ। एवमनेके राजानः दन्तवक्रः, करुषः, कलभः, मेघवाहनः, मुरः, यवनराजः, चेदिराजः, चतुर्यः, आहुतिः, भीष्मकः इत्याद्यनेके राजानः जरासन्धस्य शरणं गताः। केचन भयं प्राप्य चतुर्षु दिक्षु पलायनमकुर्वन्। जरासन्धस्य बलं, पराक्रमः, सैन्यञ्च अतिविस्तारमस्ति।

**अनारमन्तो निघ्नन्तो महास्त्रैः शतघातिभिः।**

**न हन्याम वयं तस्य त्रिभिर्वर्षशतैर्बलम्।।**[4]

जरासन्धोऽपि यज्ञकरणेच्छया सर्वान् महाराजान् गह्वरे बन्धनं कृतवान्। जरसन्धभयात् वयमपि मधुरां त्यक्त्वा द्वारावतीपुरीं प्रति पलायिताः आस्म। अतः यज्ञकरणाय प्रप्रथमं राजानाम् विमोचनं, जरासन्धस्य वधश्च अवश्यमेव करणीयम्। तत्पश्चात् भीमोऽपि एवमवदत् –

**कृष्णे नयो मयि बलं जयः पार्थे धनञ्जये।**

**मागधं साधयिष्यामो वयं त्रय इवाग्नयः।।**[5]

यज्ञसमास्यै त्र्यग्निरपेक्षते इत्यतः कृष्णस्य नीतिः, मम बलं, अर्जुनस्य पराक्रमः त्र्यग्नयः इव जरासन्धं घ्नन्त्येव। भीमार्जुनौ कथं बृहद्रथपुत्रं जरासन्धं हन्तुं समर्थाविति युधिष्ठिरः चिन्तयामास।

---

1. महाभारतम् – सभापर्व – 11.66
2. महाभारतं – सभापर्व – 12.5
3. महाभारतम् – सभापर्व – 12.15
4. महाभारतम् – सभापर्व – 13.35
5. महाभारतं – सभापर्व – 14.9

**भीमार्जुनौ उभौ नेत्रे मनो मन्ये जनार्दनम्।**
**मनश्चक्षुर्विहीनस्य कीदृशं जीवितं भवेत्।।**[1]

यज्ञसमापनाय जरासन्धस्य मरणमवश्यं भवेद्येव। वयं तु अस्त्र – शस्त्रसम्पन्नाः मा बिभेदिति भीमार्जुनौ युधिष्ठिरं सान्त्वयामासतुः।

**जरासन्धविनाशं च राज्ञां च परिमोक्षणम्।**
**यदि कुर्याम यज्ञार्थं किं ततः परमं भवेत्।।**[2]

इत्येतानि वचनानि श्रुत्वा युधिष्ठिरः राजसूययागं प्रारम्भमकरोत्।

**के के राजानः यागाय आहूताः**

युधिष्ठिरः राजसूययागाय अनेकानाहूतवान् ते यथा अत्यन्तनिष्णातारः ब्राह्मणाः, व्यासमहर्षिः, भरद्वाजः, सुमन्तः, गौतमः, असितः, वशिष्ठः, च्यवनः, कण्वः, मैत्रेयः, कवसः, त्रितः, विश्वामित्रः, वामदेवः, सुमतिः, जैमिनिः, क्रतुः, पैलः, पराशरः, गर्गः, वैशम्यपायनः, अथर्वः, अहर्वशः इत्यादयः महर्षयः, धौम्य – परशुराम – शुक्राचार्य – आसुरि – वीतिहोत्र –मधुच्छन्द – वीरसेन – अकृतव्रण – कृपा – भीष्म – धृतराष्ट्र – दुर्योधनादयः आहूताः। तथैव क्षत्रियाः, वैश्याः, शूद्राः अपि आहूता आसन्। भीष्मक – रुक्मि – कर्ण – एकलव्य – शल्य – शिशुपाल – जयद्रथ इत्यादयः, शिवः, ब्रह्मदेवः इत्याद्यनेके आहूताः।

**चत्वारः भ्रातरः कुत्र कुत्र प्रेषिताः**

इन्द्रप्रस्थाधिकारस्थापनार्थं करसङ्ग्रहाय भीमः पूर्वदिशि अगमत्। तत्र भीमः अङ्ग – वङ्ग – कलिङ्ग नामक त्रिभिः राज्यैस्सह युद्धमकरोत्। अङ्गराजः कर्णः भीमहस्ते पराजयं प्राप्तवान्। स च चक्रवर्तिनः आधिपत्यमङ्गीचकार।

अर्जुनः उत्तरदिशि प्रेषितः। तत्र कुनिन्दराजान्, प्रतिविन्ध्यराजानं, प्रज्ञाज्योतिषां, वृहन्तम्, सेनबिन्दुराज्यं, मोदापुरं, वामदेवं, सुदामनं, सुसंकुलं, पौरराज्यं, काश्मीरं, त्रिगर्तं, कोकण्डम्, अभिसारिनगरं, चित्रायुधं, चोलराजान्, बाह्लिकान्, काम्भोजराजान्, ऋषिकान्, किंपुरुषान्, गुह्यकान्, लकमानसान्, हरिवर्षान् जितवानिति विज्ञेयः। एवमेव नकुलसहदेवावपि दक्षिणप्रतीचीदिक्षु गत्वा युद्धं कृत्वा अनेकराज्यान् जितवन्तौ। एवं युधिष्ठिरः सामर्थ्यानुसारेण राजसूययागं कृत्वा सफलीकृतो जातः। चक्रवर्तिपदवीञ्चा-प्राप्नोत्।

**उपसंहारः**

श्रीकृष्णस्य अनुग्रहेणैव युधिष्ठिरः प्रथमम् अश्वमेधयागं ततः राजसूययागञ्च कृत्वा समस्तभूमण्डलं चक्रवर्तिस्थाने स्थित्वा पालयामासेति महाभारतात् विज्ञायते।

**आधारग्रन्थसूची**


1. संस्कृतसाहित्येतिहासः – श्रीरामचन्द्रमिश्रः – चौखम्बाविद्याभवन्, वारणासी।
2. महाभारतम् – वेदव्यासः – चित्रशालाप्रेस् – पूना।

याज्ञवल्क्यस्मृतिः - याज्ञवल्क्यः - श्रीवेङ्कटेश्वरमुद्रणालयः – मुम्बयी।


1. महाभारतं – सभापर्व – 15.2
2. महाभारतं – सभापर्व – 15.14